मांसगोऽपि तृतीयः स्याच्चतुर्थोऽस्थिसमाश्रितः ।
सर्व्वधातुगतो ज्ञेयो जीर्णो धातुचयङ्करः ॥
भूतजे भूतविद्या स्याद्दधाति समताड़नम् ।
वासाधात्रीदारुपथ्या नागरत्रिफला भवः ॥
मधुना संयुतः क्वाथश्चातुर्थकनिवारणः ॥
अगस्तिपत्रस्वरसो निहन्ति
नस्ये च चातुर्थकरोगमुग्रम् ।
कासं भ्रमञ्चापि शिरोरुजाञ्च
विनाशयत्याशु हि तन्नराणाम् ॥”
इति हारीते चिकित्सास्थाने द्वितीयेऽध्याये ॥)

चातुर्भद्रं, क्ली, (चतुर्भद्रमेवेति अण् ।) नागरातिविषामुस्ता गुडूचीति चतुष्टयम् । इति राजनिर्घण्टः ॥

चातुर्म्मास्य, क्ली, (चतुर्षु मासेषु क्रियते इति । “चतुर्म्मासाण्ण्यो यज्ञे ।” ५ । १ । ६४ । इत्यस्य सूत्रस्य वार्त्तिकोक्त्या ण्यः ।) यागविशेषः । चातुर्म्मास्ययागस्य चत्वारि पर्व्वाणि । वैश्वदेवो वरुणप्रघासः शाकमेधः शुनासीरीयश्चेति शब्दार्थचिन्तामणिः ॥) आषाढ़शुक्लद्वादश्यादिचतुर्म्मासकर्त्तव्यनियमविशेषः । “यदुक्तं वाराहे ।
‘आषाढ़शुक्लद्वादश्यां पौर्णमास्यामथापि वा ।
चातुर्म्मास्यव्रतारम्भं कुर्य्यात् कर्कटसंक्रमे ॥
अभावे तु तुलार्केऽपि मन्त्रेण नियमं व्रती ।
कार्त्तिके शुक्लद्वादश्यां विधिवत्तत् समापयेत् ॥
चतुर्धापि हि तच्चीर्णं चातुर्म्मास्यं व्रतं नरः ।
कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तत् समापयेत् ॥’
मात्स्ये ।
‘चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
मधुस्वरो भवेन्नित्यं नरो गुड़विवर्ज्जनात् ॥
तैलस्य वर्ज्जनादेव सुन्दराङ्गः प्रजायते ।
कटुतैलपरित्यागात् शत्रुनाशः प्रजायते ॥
लभते सन्ततिं दीर्घां स्थालीपाकमभक्षयन् ।
सदा मुनिः सदा योगी मधुमांसस्य वर्ज्जनात् ॥
निराधिर्नीरुगोजस्वी विष्णुभक्तश्च जायते ।
एकान्तरोपवासेन विष्णुलोकमवाप्नुयात् ॥
धारणान्नखलोम्नाञ्च गङ्गास्नानं दिने दिने ।
ताम्बूलवर्ज्जनाद्भोगी रक्तकण्ठश्च जायते ।
घृतत्यागात् सुलावण्यं सर्व्वं स्निग्धं वपुर्भवेत् ॥
फलत्यागात्तु मतिमान् बहुपुत्त्रश्च जायते ।
नमो नारायणायेति जप्यानशनजं फलम् ॥
पादाभिवन्दनाद्विष्णोर्लभेद्गोदानजं फलम् ।
एवमादिव्रतैः पार्थ ! तुष्टिमायाति केशवः ॥’
सनत्कुमारः ।
‘इदं व्रतं मया देव ! गृहीतं पुरतस्तव ।
निर्व्विघ्नां सिद्धिमाप्नोतु प्रसन्ने त्वयि केशव ! ॥
गृहीतेऽस्मिन् व्रते देव ! यद्यपूर्णे त्वहं म्रिये ।
तन्मे भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्द्दन ! ॥’
समाप्तौ च ।
‘इदं व्रतं मया देव ! कृतं प्रीत्यै तव प्रभो ! ।
न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्द्दन ! ॥’
अत्रैव यतिमधिकृत्य काठकगृह्यम् ।
‘एकरात्रं वसेद्ग्रामे नगरे पञ्चरात्रकम् ।
वर्षाभ्योऽन्यत्र वर्षासु मासांश्च चतुरो वसेत् ॥’
एतद्यतिविषयम् । ‘ऊर्द्ध्वं वार्षिकाभ्यां मासाभ्यां नैकस्थानवासी’ इति शङ्खोक्तेः ।” इति तिथ्यादितत्त्वम् ॥ * ॥ अन्यच्च । तत्रोपक्रमकालः सनत्कुमारेणोक्तः ।
“एकादश्यान्तु गृह्णीयात् संक्रान्तौ कर्कटस्य तु ।
आषाढ्यां वा नरो भक्त्या चातुर्म्मास्योदितं
व्रतम् ॥”
तत्र मन्त्रः ।
“चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
इमं करिष्ये नियमं निर्व्विघ्नं कुरु मेऽच्युत ! ॥”
अथ चातुर्म्मास्यनियमावश्यकता भविष्ये ।
“यो विना नियमं मर्त्यो व्रतं वा जप्यमेव वा ।
चातुर्म्मास्यं नयेन्मूर्खो जीवन्नपि मृतो हि सः ॥”
अथ चातुर्म्मास्यनियमाः । स्कान्दे नागरखण्डे ।
“श्रावणे वर्ज्जयेच्छाकं दधि भाद्रपदे तथा ।
दुग्धमाश्वयुजे मासि कार्त्तिके चामिषं त्यजेत् ॥”
तत्रैव श्रीब्रह्मनारदसंवादे ।
“निष्पावान् राजमाषांश्च सुप्ते देवे जनार्द्दने ।
यो भक्षयति विप्रेन्द्र ! श्वपचादधिको हि सः ॥
कार्त्तिके तु विशेषेण राजमाषांश्च भक्षयन् ।
निष्पावान् मुनिशार्दूल ! यावदाभूतनारकी ॥
कलिङ्गानि पटोलानि वृन्ताकसहितानि च ।
एतानि भक्षयेद्यस्तु सुप्ते देवे जनार्द्दने ॥
सप्तजन्मार्ज्जितं पुण्यं हरते नात्र संशयः ॥”
किञ्च ।
“दृष्टं तत्तत्कालभक्ष्यं फलमूलादि वर्ज्जयेत् ।
जपहोमाद्यनुष्ठानं नामसङ्कीर्त्तनन्तथा ।
स्वीकृत्य प्रार्थयेद्देवं गृहीतनियमो बुधः ॥
इदं व्रतं मया देव ! गृहीतं पुरतस्तव ।
निर्व्विघ्नं सिद्धिमायातु प्रसादात्तव केशव ! ॥
गृहीतेऽस्मिन् व्रते देव ! पञ्चत्वं यदि मे भवेत् ।
तदा भवतु सम्पूर्णं प्रसादात्ते जनार्द्दन ! ॥”*॥
अथ चातुर्म्मास्यव्रतनियममाहात्म्यम् । विष्णुरहस्ये ब्रह्मनारदसंवादे ।
“शृणु नारद ! कार्त्स्न्येन चातुर्म्मास्यव्रतक्रियाः ।
या निर्व्वर्त्त्य नरो भक्त्या प्रयाति परमां गतिम् ॥
व्रतानि वैष्णवानीह मनसापि चिकीर्षतः ।
नरस्य क्षयमाप्नोति पापं जन्मशतोद्भवम् ॥
एकभक्तो नरः शान्तो नित्यस्नायी दृढ़व्रतः ।
योऽर्च्चयेच्चतुरो मासान् हरिं स्यात्तस्य लोक-
भाक् ॥
यस्तु सुप्ते हृषीकेशे क्षितिशायी भवेन्नरः ।
वार्षिकान् चतुरो मासान् लभते वैष्णवीं गतिम् ॥
यस्तु केशवमुद्दिश्य चान्द्रायणपरायणः ।
चातुर्म्मास्यं नयेद्भक्त्या स विष्णुतनुमाविशेत् ॥”
भविष्योत्तरे भगवद्युधिष्ठिरसंवादे ।
“चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
स्त्री वा नरो वा मद्भक्तो धर्म्मार्थं सुदृढ़व्रतः ॥
गृह्णीयान्नियमानेतान् दन्तधावनपूर्व्वकम् ।
तेषां फलानि वक्ष्यामि तत्कर्त्तॄणां पृथक् पृथक् ॥
मधुरस्वरसम्पन्नो भवेल्लवणवर्ज्जनात् ।
लभते सन्ततिं दीर्घां तैलस्य परिवर्ज्जनात् ॥
अभ्यङ्गवर्ज्जनात् पार्थ ! सुन्दराङ्गः प्रजायते ।
पक्वतैलपरित्यागाच्छत्रुनाशमवाप्नुयात् ॥
मधूकतैलत्यागेन सौभाग्यमतुलं भवेत् ।
पुष्पोपभोगत्यागेन स्वर्गे विद्याधरो भवेत् ॥
योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात् ।
कट्वम्लतिक्तमधुरक्षारकाषायजान् रसान् ॥
यो वर्ज्जयेत् स वैरूप्यं वैगन्ध्यं नाप्नुयात् क्वचित् ।
ताम्बूलवर्ज्जनाद्भोगी अपक्वादोऽमलो भवेत् ॥
पादाभ्यङ्गशिरोऽभ्यङ्गपरित्यागाच्च पार्थिव ! ।
दीप्तिमान् दीप्तचरणो यक्षो द्रव्यपतिर्भवेत् ॥
दधिदुग्धतक्रनियमात् गोलोकं लभते नरः ।
इन्द्रातिथित्वमायाति स्थालीपाकविवर्ज्जनात् ॥
लभेच्च सन्ततिं दीर्घां तापपक्वस्य वर्ज्जनात् ।
भूमौ प्रस्तरशायी च विष्णोरनुचरो भवेत् ॥
सदा मुनिः सदा योगी मधुमांसस्य वर्ज्जनात् ।
निर्व्याधिर्नीरुगोजस्वी सुरामद्यविवर्ज्जनात् ॥
एकान्तरोपवासेन ब्रह्मलोके महीयते ।
धारणान्नखलोम्नां गङ्गास्नानं दिने दिने ॥
मौनव्रती भवेद्यस्तु तस्याज्ञाऽस्खलिता भवेत् ।
भूमौ भुङ्क्ते सदा यस्तु स पृथिव्याः पतिर्भवेत् ॥
नमो नारायणायेति जप्त्वा दानशतं फलम् ।
पादाभिवन्दनाद्विष्णोर्भवेद्गोदानजं फलम् ॥
विष्णुपादाम्बुजस्पर्शात् कृतकृत्यो भवेन्नरः ।
विष्णोर्द्देवकुले कुर्य्यादुपलेपनमार्ज्जने ॥
कल्पस्थायी भवेद्राजा स नरो नात्र संशयः ।
प्रदक्षिणशतं यस्तु करोति स्तुतिपाठकः ॥
हंसयुक्तविमानेन स च विष्णुपदं व्रजेत् ।
गीतवाद्यकरो विष्णोर्गान्धर्व्वं लोकमाप्नुयात् ॥
नित्यं शास्त्रविनोदेन लोकान् यस्तु प्रबोधयेत् ।
स व्यासरूपी भगवानन्ते विष्णुपुरं व्रजेत् ॥
पुष्पमालाकुलां पूजां कृत्वा विष्णोः पुरं व्रजेत् ।
कृत्वा प्रैक्षणिकं दिव्यं स्थानमप्सरसां लभेत् ॥
तीर्थाम्भसि कृतस्नानो निर्म्मलं देहमाप्नुयात् ।
पञ्चगव्याशनात् पार्थ ! चान्द्रायणफलं लभेत् ॥
एकभक्ताशनान्नित्यमग्निहोत्रफलं लभेत् ।
नक्तभोजी समग्रस्तु तीर्थयात्राफलं लभेत् ॥
अयाचितेन चाप्नोति वापीकूपप्रपाफलम् ।
षष्ठकालेऽन्नभोजी यः स्थायी स्वर्गे नरो भवेत् ॥
नित्यस्नायी नरो यस्तु नरकं स न पश्यति ।
भाजनं वर्ज्जयेद्यस्तु स स्नानं पौष्करं लभेत् ॥
पत्रेषु यो नरो भुङ्क्ते कुरुक्षेत्रफलं लभेत् ।
शिलायां भोजनं नित्यं भवेत् स्नानं प्रयागजम् ॥
यामद्वयजलत्यागान्न रोगैः परिभूयते ।
एवमादिव्रतैः पार्थ ! तुष्टिमायाति तोषितः ॥”
किञ्च ।
“योगनिद्रां समालम्ब्य शेषाहिशयने स्वपन् ।
क्षीरोदतोयवीच्यग्रधौतपादः समाहितः ॥
लक्ष्मीकराम्बुजैः शश्वन्मृज्यमानपदद्वयः ।
तस्मिन् काले च मद्भक्तो यो मासांश्चतुरः क्षिपेत् ॥
व्रतैरनेकैर्नियमैः पाण्डवश्रेष्ठ ! मानवः ।
कल्पस्थायी विष्णुलोके भवेन्नास्त्यत्र संशयः ॥